शृङ्गेरी द्वारका पुरी ज्योतिष्पीठाचार्य स्वीकृता शासन संमता विद्वत्प्रिया पाक्षिकी पत्रिका क

शारदा

संपादकः प. वसन्त अ. गाडगीळ

वार्षिकं मूल्यम् रू. २५ *** अस्य अङ्कस्य रू. १.२५

भारतीय सौर दिनाङ्क १० पौष १९०६ वर्षम् २६ : अङ्कः ९
विक्रम संवत् २०४१ सोमवासरः दिनाङ्क ३१.१२.१९८४
पुणे डेरवण (चिपळूण) यज्ञ महोत्सव विशेषाङ्क दैनिकम् ७

- लोकसभा पक्ष स्थितिः । -

राष्ट्रिय पक्षः	संख्या	अस्तंगताः
संसदः स्थान संख्या	५१५	५४३
उद्घोषित निर्णय संख्या	५०३	५४३
इंदिरा काँग्रेस	३९६	३३९
तेलगूदेसम	२८	२
मार्क्सवादी	२२	३६
अण्णाद्रमुक	१२	१४
जनता	१०	२१
काँग्रेस (स)	४	
दमकि	३	
कम्युनिस्ट	६	१३
भाजप	२	१६
द्रमुक	३	१४
काँग्रेस (जे)	१	२
क्रांतीकारी समाजवादी	३	४
नॅ. काँ. फारुख	३	३
ब्र. मु. कळघम्		३
फॉरवर्ड ब्लॉक	२	३
शे.का.प.	१	
केरळ काँग्रेस	२	
सिक्कीम गणसंग्राम	१	
जनवादी		२
अपक्ष	४	१८
राष्ट्रीय संजय मंच		३
डेमॉकरॅटिक समाजवादी		८
रिक्त स्थानानि		२५

अगतिकाः सः । क्षन्तव्याः वयम् । कर्गज मुद्रणसहिती मूल्यवर्धनात् नूतने षड्विंशति (२६) - तमे (१ नोव्हेंबर १९८४) शारदीये वर्षे

शारदा - मूल्य - वर्धनम् ।

मूल्यम्	भारतवर्षे रुप्यकाणि	विदेशेषु अमेरिकन $
वार्षिकम्	२५	१०
पञ्चवार्षिकम्	१२१	५०
यावज्जीवम्	५०१	२००

श्रीशिव समर्थ मन्दिरे (डेरवण)
महायागानुष्ठान संकल्पः

शाण्डिल्य गोत्रोत्पन्नः विठ्ठलशर्मा अहम्

मम आत्मनः श्रुति स्मृति पुराणोक्त फल प्राप्त्यर्थं अस्माकं सहकुटुम्बानां सहपरिवाराणां द्विपद चतुष्पद सहितानां क्षेम स्थैर्य आयुरारोग्य ऐश्वर्याभिवृद्ध्यर्थं शांत्यर्थं पुष्ट्यर्थं तुष्ट्यर्थं वृद्धयर्थं च तथैव अनिष्ट स्थान स्थित आदित्यादि नवग्रह जन्य जनिष्यमाण सकल पीडा परिहारार्थं सदैव एकादश स्थान स्थितवत् शुभ फल प्राप्त्यर्थं पञ्च महाभूत जन्य सकलारिष्ट निरसनार्थं स्थानस्य अस्य सर्वंकष वैभव प्राप्तये जनानां मनसि स्वदेश स्वधर्मादि विषये श्रद्धोदय संवर्धनार्थं सर्वेषाम् अभ्युदयार्थं च, विश्वरक्षणार्थं सनातन वैदिकार्य धर्मस्य समुन्नत्यर्थं संकल्पित कार्याणां परिपूर्तये तन्मध्ये समुत्पन्न समुत्पत्स्यमान नानाविधानाम् अन्तरायाणां विनाशार्थम् ।

१) श्रीब्रह्म सावित्री प्रित्यर्थम् ... ऋग्वेदान्तर्गत शाकल शाखा संहिता प्रतिमंत्र हवनाख्यं कर्म करिष्ये ।

२) श्रीसिद्धीविनायक महागणपति प्रीत्यर्थं ... श्रीगणेश अथर्व शीर्षस्य लक्षावृत्ति जपं तद्दशांशेन मोदक द्रव्येण हवनं करिष्ये ।

३) श्रीमहाविष्णु प्रीत्यर्थं ... पवमान पञ्चसुक्तस्य चतुश्चत्वारिंशत् अधिक शतावृत्ति जपं करिष्ये ।

४) श्रीमद्भागवतस्य अष्टोत्तर शत पारायणाख्यं कर्म करिष्ये ।

५) पवमान पञ्चसुक्तस्य द्वादशावृत्तिभिः घृताक्त तिल द्रव्येण हवनं करिष्ये ।

६) श्रीमद्भागवतस्य दशम् स्कन्ध मंत्रैः घृताक्त तिल द्रव्येण हवनंकरिष्ये ।

७) श्रीभवानीशंकर महारुद्र प्रीत्यर्थम् ... रुद्र सूक्तानं रुद्रमंत्राणां च सहस्रावृत्ति जपं तद्दशांशेन घृताक्त तिल द्रव्येण हवनं करिष्ये । अतिरुद्र जपं वाक्यपक्षेण अतिरुद्र हवनं च करिष्ये ।

८) श्रीसूर्यनारायण प्रीत्यर्थम् ... सौरसूक्तस्य चतुश्चत्वारिंशदधिक शतावृत्ति जपं द्वादशा वृत्तिभिः घृताक्त तिल द्रव्येण हवनं च करिष्ये ।

९) श्रीमहाकाली महालक्ष्मी महासरस्वती (योगेश्वरी) प्रीत्यर्थं दुर्गा सप्तशत्याः अयुतचण्डीजपं तद्दशांशेन हवनं तद्दशांशेन मार्जनाख्यं कर्म च करिष्ये ।

१०) अहं रुद्रेभिः इति सूक्तस्य हिरण्यवर्णाम् इति सूक्तस्य सहस्रावृत्ति जपं तद्दशांशेन घृताक्त तिल द्रव्येण हवनं च करिष्ये ।

११) श्रीसीता रामचंद्र प्रीत्यर्थं वाल्मिकी रामायणस्य पञ्चावृत्ती जपं सुन्दरकाण्ड श्लोकैः घृताक्त तिल द्रव्येण हवनं च करिष्ये ।

श्रीराम जय राम जय जय राम । श्रीराम जय राम जय जय राम । श्रीराम जय राम जय जय राम । श्रीराम जय राम जय जय राम ।

यज्ञमहोत्सवे विशिष्ट विद्वांसः

वेदाचार्य नानाशास्त्री मुळे - नागपूर
पं. श्रीपादशास्त्री आठलेकर - पुणे
पं. शिवरामशास्त्री धूपकर - पुणे
पं. विनायकशास्त्री प्रकाशकर - मुम्बई
पं. भागवताचार्य पाठकशास्त्री - पुणे
पं. गणेशशास्त्री शेण्डये - पुणे
पं. लक्ष्मणशास्त्री शेण्डये - पुणे
पं. लक्ष्मीकांत दीक्षित - नासिक
पं. परशुरामशास्त्री भातखण्डे - गोरेगाव (रायगड)
पं. बाळकृष्णशास्त्री दण्डगे - बेळगाव

शृङ्गेरी-द्वारका-ज्योतिष्पीठाचार्य-स्वीकृता शासन-पुरस्कृता विश्वप्रिया

शारदा

संपादक: वसन्त अ. गाडगीळ

वर्षम् २६ अङ्क ९ सौर १० पौष १९०६ ३१ डिसेम्बर १९८४

वार्षिकं मूल्यम् रू. २५ *** अस्य अङ्कस्य रू. १.२५

गणक-यंत्राश्रिता ऋग्वेदसंहिता 'अग्निमीळे पुरोहितम्'

डेरवण-ग्रामे यज्ञ-महोत्सवे ऋग्वेद-संहिता-स्वाहाकारः संपन्नः। भारतवर्षे समुपलब्धेषु अङ्गुलि-मात्र-गण्येषु ऋग्वेद-घनपाठिषु ऋग्वेदाचार्य किंजवडेकर गुरुवर्य-नेतृत्वेन सर्वश्री आठल्ये विनायकभट्टः रत्नागिरी, ऋग्वेद सम्राट् पाध्ये, इचल करंजी, अनन्तरामभट्ट पुणताम्बेकर वाराणसी, घनपाठी भालचंद्रभट्ट फणसळकर मुंबई, वेदाचार्य चिन्तामणिभट्ट गुळसुन्दकर पुणे, वेदाचार्य दिनकरभट्ट फडके पुणे, पुणेवेदपाठशाला ऋग्वेदाचार्य गणेश कृष्ण कोतवडेकर-प्रभृतयः समुपस्थिताः सन्ति। एतादृशान् ऋग्वेदाचार्यान् आश्रित्य ऋक्-स्वाध्याय-परंपरा कथंचित् जीवति भारतवर्षे। श्रीदण्डगे-गोरे-संज्ञकं छात्र-द्वयं घनपाठार्थं सिद्धीकृतं श्रीकिंजवडेकर-गुरूत्तमेन नूतनं विश्वास-स्थानं सनातन-वैदिकार्य-धर्मस्य। महाराष्ट्रेषु पञ्चषु-स्थलेषु प्रयत्यते वेदपाठशालाभिः स्वाध्यायाध्यन-परंपरां संवर्धयितुम्। श्रीकिंजवडेकराचार्यत्वेन पुण्य-पत्तने श्रीबाबामहाराज-सहस्रबुद्धे-समाधि-मंदिर-स्थाने गतवर्षे प्रारब्धा नूतना ऋग्वेद-पाठशाला निरन्तरायं विराजते। ऋग्वेद-परंपरा गुरु-मुख-पद्धत्या संरक्षणीया इति बहुभिः बहुत्र प्रयत्यते। तत्र पुण्यपत्तन-स्थानम् असाधारणम्।

परम् अमेरिका-संचारावसरे गणक-यंत्राश्रितम् ऋग्वेदस्य प्रथमं मंत्रं दृष्ट्वा चकिताः वयम्। अत्र प्रकाशितं शारदोपासकानां कृते विज्ञान-प्रगति-परिचायकं तत् पृष्ठ-चित्रम्। ऋग्वेदारम्भ-मंत्रस्य पदपाठ-भाष्य-सनाथं दर्शनम् अत्र भवति। गणक-यंत्राश्रिता देवनागरी संपूर्णां सार्ध-दश-सहस्र-मंत्राणां ऋग्वेद-संहितां पद-पाठ-भाष्य-संहितां ग्रन्थ-बद्धां कर्तुं कथं प्रभवति तस्य परिचयः चित्र-दर्शनेन अनेन भवेत्।

अमेरिका-देशे षष्ठे विश्व-संस्कृत-संमेलने शोधपत्र-पत्रूचकं 'कॉम्प्यूटर संस्कृतं च' इति विषये श्रावितम् अमेरिकादि-विदेशस्थैः संस्कृताध्यासकैः। एकस्यापि भारतीयस्य तत्र सिद्धता प्रवृत्तिर्वा नासीत् तादृश-प्रयासेषु इति खिन्नाः वयम्।

भारत-वर्षे राष्ट्रैक्यार्थं कैश्चित् मुंबई-नगरे 'रोमन-लिपि-परिषद्' आयोजिता। राष्ट्रैक्यार्थं रोमन-लिपिः? दुर्भाग्यम् इदं भारतस्य।

ध्वनिशास्त्रदृष्ट्या महीतले शास्त्रीया सर्वोत्तमा देवनागरीं गणक-यन्तरारूढां सिद्धीकृत्य अग्निमीळे... मंत्रम्' दर्शयितुं यदा वैदेशिकाः प्रवृत्ताः सफलाश्च तस्मिन् एव समये भारतवर्षे, तत्रापि महाराष्ट्र-राजधानी-मुंबई-नगरे 'रोमन-लिपि-परिषदा राष्ट्रैक्यम्' इति स्वप्ने रममाणाः केचन दृश्यन्ते। परं भारतवर्षे कैश्चित् तथाकथितैः बुद्धिवादिभिः तिरस्कृता विस्मृतिगर्ते पातनीया इति दूरे प्रक्षिप्ताः ऋक्-संहिता, तत्रापि 'अग्निमीळे मंत्रः गणैकयंत्राश्रयेण अमेरिका-राष्ट्रे ग्रन्थरूपेण देवनागरी लिप्या येन केनापि आकारेण विविध-रूपेण सर्वान् विस्मापयति इति विज्ञानस्य महत्ता। किं बुद्धिवादिनः स्वीकुर्वन्ति आह्वानम् अध्यात्म-विद्या-मूलस्य गणकयंत्रे विराजमानस्य ऋग्वेदस्य?

स्मर्यताम् । श्रूयताम् ।। स्मर्यताम्

आ का श वा णी

डॉयशे वेले कलोन (पश्चिम जर्मनी)

प्रतिमासं द्वितीये सोमवासरे रात्रौ ९.२५ तः ९.३७

लघुलहरी ११७६५, ११७९५, १५३२०, १७८७५

विषयः जर्मनीदेशे विश्वे च सर्वत्र संस्कृत - वार्ताः

संस्कृत-कार्यक्रम-संचालिका - डॉ. याज्ञसेनी पोपट

कॉम्प्युटर 'अग्निमीळे पुरोहितम्...

डेरवण गावी यज्ञ-महोत्सवातील ऋग्वेद-संहिता-स्वाहाकार संपन्न झाला. उभ्या भारतात शिल्लक असलेल्या हाताच्या बोटावर मोजण्याइतक्याच घनपाठी ऋग्वेदी आचार्यांपैकी प्रमुख वैदिक सर्वश्री विनायकभट्ट आठल्ये (रत्नागिरी), इचलकरंजीचे ऋग्वेद सम्राट् सखारामभट्ट पाध्ये, वाराणसीचे अनंतरामभट्ट पुणताम्बेकर, मुम्बईचे भालचंद्रभट्ट फणसळसर आणि पुण्याचे वेदाचार्य दिनकरभट्ट फडके, घनपाठी चिन्तामणिभट्ट गुळसुन्दकर, वेदपाठशाळाचार्य ग. कृ. कोतवडेकर इत्यादी याप्रसंगी उपस्थित आहेत. यांसारख्या दुर्मिळ वेदाचार्यांमुळे 'आज ऋग्वेदाची परंपरा भारतात कशीबशी तग धरून आहे. घनपाठी किंजवडेकरगुरुजींनी श्री. दण्डगे व गोरे हे दोन उदयोन्मुख घनाध्यासक तयार करून दिले आहेत. हे सनातन वैदिक आर्य धर्माचे विश्वासस्थान आहे. महाराष्ट्रात पाच-सहा ठिकाणी तुरळक चालू असणाऱ्या वेदपाठशाळा वेदाध्यासाची परंपरा टिकविण्यासाठी यत्नशील आहेत. किंजवडेकर-गुरुजींच्या आचार्यत्वाने पुण्यात श्री-बाबामहाराज सहस्रबुद्धे-समाधि-मन्दिरात चालू झालेली नवीन ऋग्वेद-पाठशाळा निर्विघ्नपणे चालू आहे. गुरु-मुख-परंपरेने महाराष्ट्रात ऋग्वेदाचा अभ्यास सुरक्षित रहावा यासाठी अनेक ठिकाणी अनेकांचे प्रयत्न सुरू आहेत. त्या सर्वांत पुण्य नगरीचे स्थान असाधारण महत्त्वाचे आहे.

परंतु तिकडे अमेरिकेत नुकत्याच केलेल्या दौऱ्यात कॉम्प्युटरवर ऋग्वेदाचा पहिला मंत्र बघून आम्ही थक्क झालो. आज विज्ञानाची दौड कशी चालू आहे याचा परिचय घडविणारे त्याचे छायाचित्र 'शारदा'च्या वाचकांसाठी आज देत आहोत.

ऋग्वेदाच्या पहिल्या मंत्राचे पदपाठ-भाष्यासह येथे कॉम्प्युटरवर दर्शन घडविलेले आहे. गणक-यंत्रावर बसविलेले देवनागरी आता संपूर्ण ऋग्वेदाच्या १०,५०० मंत्रांचे सर्व विकृतींसह सभाष्य दर्शन ग्रंथरूपाने कसे घडवू शकते त्याची यामुळे कल्पना येऊ शकते.


अमेरिकेतील सहाव्या विश्व-संस्कृत-संमेलनात 'कॉम्प्युटर आणि संस्कृत' या विषयावर पाच शोधपत्रांचे वाचन झाले, ते सारे अमेरिका वगैरे विदेशांतील संशोधकांचे. एकाहि भारतीयाची याबाबत तयारी अगर प्रवृत्ती नाही,याचा आम्हाला खेद वाटला.

भारताच्या राष्ट्रैक्यासाठी रोमन-लिपी-परिषद् मुम्बईत झाली. 'राष्ट्रैक्यासाठी रोमन?' हे तर भारताचे दुर्भाग्यच.

ध्वनिशास्त्रदृष्ट्या संपूर्णतः शास्त्रीय सर्वोत्तम ठरलेली देवनागरी कॉम्प्युटरवर बसवून त्यावर 'अग्निमीळे...' मंत्र-संहिता देणारे विदेशी आणि त्याचवेळी भारतात महाराष्ट्राच्या राजधानीत मुम्बईत रोमन-लिपी-परिषदेने राष्ट्रैक्याच्या स्वप्नात गुल् होणारे आळळतात. परंतु भारतात काही तथाकथित बुद्धीवाद्यांनी टाकावू ठरवून विसरून जावी म्हणून दूर फेकून दिलेला ऋग्वेद, त्यातसुद्धा अग्निपूजापर पहिलाच मंत्र 'अग्निमीळे पुरोहितम्। कॉम्प्युटरवर देवनागरीत ग्रंथरूप घेताना अमेरिकेत हव्या त्या आकाराने वा प्रकाराने सर्वांना थक्क करू शकतो हा तर विज्ञानाचा महिमा. काय आजचे हे बुद्धीवादी अध्यात्मविद्येचे मूळ असणाऱ्या या ऋग्वेदाच्या कॉम्प्युटरवरील दर्शनाने मिळणारे आह्वान स्वीकारणार का?

देवनागरी-लिप्यक्षराणां कृते माकिन्तोष कॉम्प्युटर

ॲपल-कॉम्प्युटर-प्रातिनिध्येन श्री. मार्क कटर महोदयेन अमेरिका-देशे षष्ठे विश्व-संस्कृत-सम्मेलने 'देवनागरी-लिप्यक्षराणां कृते माकिन्तोष-कॉम्प्युटर-गणकयंत्रस्य उपयोगः इति शोधपत्रं पठित्वा तत्कार्यं परिचायितम्। अनेन यंत्रेण मुद्राक्षर-संयोजनं (कम्पोजिंग) मुद्रणं च मुद्रणार्हस्य सुलभीभवति। परस्पर-लिपि-विनिमयादिकम् अपि सुकरम्।



ऋग्वेदे म-१ अ-१ सू-१

प्रथमो ऽष्टकः

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥ १॥

अग्निम्। ईळे। पुरःऽहितम्। यज्ञस्य। देवम्। ऋत्विजम्।
होतारम्। रत्नऽधातमम्॥ १॥

अग्निनामकं देवम् ईळे स्तौमि। *ईळे स्तुतौ* इति धातुः। ळकारस्य ळकारो बह्वृचाध्येतृसंप्रदायप्राप्तः। तथा च पठ्यते —*अज्मदध्यस्थडकारस्य लकारो बह्वृचा जगुः। अज्मदध्यस्थढकारस्य ळकारः वै यथाक्रमम्*- इति॥ मन्त्रस्य होता प्रयोज्यत्वाद्हं होता स्तौमीति ऊह्यते। कीदृशमग्निम्। यज्ञस्य पुरोहितम्। यथा राज्ञः पुरोहितस्तदभीष्टं संपादयति तथाग्निरपि यज्ञस्यापेक्षितं होमं संपादयति। यद्वा। यज्ञस्य संबन्धिनि पूर्वभागे आवहनीयरूपेणावस्थितम्। पुनः कीदृशम्। देवं दानादिगुणयुक्तम्। पुनः कीदृशम्। होतारम् ऋत्विजम्।

This is from the first hymn of the ऋग्वेद, together with the commentary of सायण (the beginning thereof, at least), copied literally from the Poona edition (in which some of the *sandhi* is omitted). In transliteration, this would be:


Agnināmakaṃ devam Ile staumi. "Ile stutau" iti dhātuḥ. Ḷakārasya ḷakāro bahvṛcādhyetṛsaṃpradāyaprāptaḥ. Tathā ca paṭhyate: "ajmadhyasthaḍakārasya ḷakāraṃ bahvṛcā jaguḥ. Ajmadhyasthaḍhakārasya ḷhakāraḥ vai yathākramam" iti. Mantrasya hotrā prayojyatvād "ahaṃ hotā staumi" iti labhyate. Kīdṛśam agnim? Yajñasya purohitam. Yathā rājñaḥ purohitas tad abhīṣṭaṃ saṃpādayati tathāgnir api yajñasyāpekṣitam homaṃ saṃpādayati. Yadvā: yajñasya saṃbandhini pūrvabhāge āvahanīyarūpeṇāvasthitam. Punaḥ kīdṛśam? Devaṃ dānādiguṇayuktam. Punaḥ kīdṛśam? Hotāram ṛtvijam.... (see page33, वैदिक-संशोधन-मण्डलेन प्रकाशिता ऋग्वेदसंहिता, प्रथमो भागः).

Note also the Tamil transliteration:


அக்நிம் ஈளே புரோஹிதம் யக்ஞஸ்ய தேவம் ருத்விஜம்
ஹோதாரம் ரத்நதாதமம்.

இது தமிழ் எழுத்துக்களில் இருக்குவேதத்தின் முதல் செய்யுள்.


शारदा : २६ : ९ पक्षीकृत - क्रमाङ्कः PNCW १०७ पूर्वमूल्यं विना प्रेषा अनुज्ञा क्र. ७१ पुणे ३० पृथक्करणकार्यालये समर्पितम् १०.१.१९८५




Uppercase, no option



Lowercase, no option



Option, Uppercase



Option, lowercase

यज्ञ-नारायण-दर्शनम्

प्रातः ८ तः ११

सायं ४.३० तः ५.३०

इतर-समये निषिद्धः प्रवेशः

'शारदा-दैनिक-वितरण-केन्द्रम्

राजा दीक्षित वृत्तपत्रागारम्

चिपळूण (रत्नागिरी) ४१५६०५

संपादकः मुद्रकः प्रकाशकः स्वामी - पं. वसन्त अनन्त गाडगीळ, बी.ए.बी.एड्., साहित्य-विशारद (पुणे दूरध्वणी - ५२१२४)
मुद्रण-स्थलम - शारदा-मुद्रण-सिद्धि मन्दिरम, पुणे १६ मे. कोकण प्रिंटर्स, चिपळूण ४१५६०५ (दूरवाणी १०१)
प्रकाशन-स्थलम् - श्रीशिव-समर्थ-मन्दिरम्, डेरवण (चिपळूण - रत्नागिरी) शारदा, २ झेलम, पत्रकारनगरी, पुणे ४११ ०१६